# केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058

दूरभाषसङ्ख्या – 011 -28524993, 28524995, 28520979, 28520966

अन्तर्जालपुटम् - www.sanskrit.nic.in


**अधिसूचनायाः संख्या - के.सं.वि./36014/विज्ञापनम्/एस्-III/2023-24/01** **दिनाङ्कः – 07/07/2023**

## 2023-24 वित्तीयवर्षे संस्कृतसंवर्धनयोजनाः उपलक्ष्य वित्तीयसहायतायाः प्रदानार्थम् अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्

संस्कृतस्य संवर्धनाय केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानाः भारतसर्वकारस्य शिक्षामन्त्रालयस्य निम्नलिखिताः केन्द्रीययोजनाः उपलक्ष्य 2023-24 वर्षस्य कृते वित्तीयसहायतायाः प्रदानार्थं नियमानुसारं सर्वकारेतरसंस्थाभिः/स्वैच्छिकसङ्घटनैः/संस्थाभिः/विश्वविद्यालयैः/ प्रकाशकैः/वैयक्तिकरूपेण/छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालमाध्यमेन पञ्जीकरणम् | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1 | **संस्कृतशिक्षणम्** - पारम्पारिकसंस्कृतपाठशालासु/महाविद्यालयेषु/सर्वकारीयविद्यालयेषु/ चतुष्पाठिसंस्थासु शिक्षणार्थं संस्कृताध्यापकानाम् अथवा आधुनिकविषयकाध्यापकानां व्यवस्था तथा आवासीयच्छात्रवृत्तिश्च । | 10.07.2023 | 08.09.2023 |
| 2 | **सम्मानराशिः -** अभावग्रस्तपरिष्ठितिषु वर्तमानानां संस्कृतपण्डितानां कृते वार्षिकवृत्तिः । | | |
| 3 | **संस्कृतसंवर्धनाय कार्यक्रमाः एवं गतिविधयः -** विभिन्नसंस्कृतसंवर्धनकार्यक्रमाणाम् आयोजनार्थं वित्तीयसहायता । | | |
| 4 | **संस्कृतपुस्तकानां प्रकाशनं सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च** | | |
| 5 | **शास्त्रचूडामणिः -** संस्कृतशास्त्रशिक्षणार्थं शास्त्रविदुषाम् अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगः । | | |
| 6 | **व्यावसायिकप्रशिक्षणम् -** पञ्जीकृतासु पारम्पारिकसंस्कृतसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम् । | | |
| 7 | **अष्टादशी -** संस्कृतसंवर्धनाय अष्टादशपरियोजनाः । (निर्धारितक्षेत्रेषु एव आवेदनीयम्) | | |
| 8 | **मेधावी-छात्रवृत्तिः -** पारम्परिक-आधुनिकधारासु नियमितरूपेण नवमीकक्षातः विद्यावारिधिपर्यन्तं संस्कृतम्/पालिं/प्राकृतम् अधीयानेभ्यः छात्रेभ्यः छात्रवृत्तिः । | 10.07.2023 | 31.10.2023 |

उपर्युक्तानां योजनानां कृते आवेदनं केवलम् अन्तर्जालमाध्यमेनैव (Online mode only) स्वीक्रियते । अन्येन माध्यमेन प्राप्तानि आवेदनानि न स्वीक्रियन्ते । परन्तु प्रत्येकं योजनायाः दिशानिर्देशानुसारं प्रकाशनसामग्र्यः/पुस्तकानि/अनिवार्यपत्राणि सक्षमाधिकारिणा प्रमाणितस्य अन्तर्जाले प्रपूरितस्य आवेदनपत्रस्य प्रतिलिप्या सह पृथग्रूपेण पञ्जीकृतपत्राचारमाध्यमेन (Registered Post) **20.09.2023** दिनाङ्काभ्यन्तरे **"निदेशकः (केन्द्रीययोजनाः), (.....योजनायाः नाम....), केन्द्रीयसंस्कृतविश्वविद्यालयः, 56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली -110058"** इति पत्रसङ्केतं प्रति प्रेषणीयानि भवन्ति । आवेदनपत्रस्य प्रपूरणात् प्राक् योजनानां दिशानिर्देशाः अवश्यं पठनीयाः । प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकपत्राणि, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य अग्रेसरणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटं **www.sanskrit.nic.in/schemes** अवलोकयन्तु । योजनायाः नियमानुसारं विगतवर्षेषु प्राप्तानाम् आवेदनानां स्वतः नवीनीकरणं न सम्भवति । अतः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतां प्राप्तुं प्रतिवर्षं पृथग् रूपेण आवेदनं कर्तव्यम् । आवेदनानां स्वीकृतिः अथवा तिरस्कृतिः धनस्य उपलब्धताम् आधारीकरोति । अतः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतायाः निमित्तं पृथक्तया आवेदनं समर्पणीयं भवति । कस्याः अपि योजनायाः विषये स्पष्टीकरणार्थम् अथवा संशयनिवारणार्थम् उपरि प्रदत्तदूरभाषसङ्ख्यया अथवा पत्राचारसङ्केतद्वारा उत ई-मेल **help.schemes@csu.co.in** माध्यमेन वा सम्पर्कयितुं शक्नुवन्ति ।

हस्ता/-

**निदेशकः (केन्द्रीययोजनाः)**